# मुहूर्त्तचिन्तामणिः


विषयः–मुहूर्त्तचिन्तामणिः
कक्षा–शास्त्रीप्रथमवर्षम्
पत्रम्–पंचम

डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा


## अतिलघूत्तरप्रश्नाः

1-ज्योतिषशास्त्रे केषां वर्णनं भवति ?

उ०-ग्रह–नक्षत्रादीनां (ज्योतिष्पिण्डानां) वर्णनम् अस्ति।

2-वेदस्य चक्षुः कः ?

उ०- वेदस्य चक्षुः ज्योतिषम् अस्ति।

3-वेदागज्योतिषम् केन रचितम् ?

उ०-महात्मना लगधेन रचितम्।

4-ऋग्ज्योतिषे कति कारिकाः ?

उ०- ऋग्ज्योतिषे षट्त्रिंशत् (36) कारिकाः सन्ति।

5-अथर्वज्योतिषम् केन सम्बन्धितम् ?

उ०- अथर्वज्योतिषम् फलितज्योतिषेन सम्बन्धितम्।

6-ज्योतिषशास्त्रप्रवर्तकाः आचार्याः कति ?

उ०-अष्टादश।

7-सौरादिपञ्चसिद्धान्तानां संकलनं वराहमिहिरः कस्मिन् ग्रन्थे कृतवान् ?

उ०-पञ्चसिद्धन्तिकायाम्।

8-सिद्धान्तशिरोमणिः कस्य रचना अस्ति ?

उ०-भास्कराचार्यस्य।

9-ज्योतिषशास्त्रस्य कति स्कन्धाः प्रसिद्धाः ?

उ०-त्रयः।

10-त्रुट्यादिकालगणना कस्मिन् स्कन्धे क्रियते ?

उ०-सिद्धान्तस्कन्धे।

11-के पञ्चसिद्धान्ताः ?

उ०- 1-सौरः 2-पौलिशः 3-रोमकः 4-वाशिष्ठः 5-पैतामहश्च पञ्चसिद्धान्ताः

12- सिद्धान्तस्कन्धस्य के भेदाः ?


केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

उ०-त्रयः- 1- सिद्धान्तः 2-तन्त्रम् 3-करणम्

13-ग्रहलाघवं सिद्धान्तग्रन्थः करणग्रन्थो वा ?

उ०-करणग्रन्थम्

14-तन्त्रे अभीष्टशकात् कालगणना क्रियते सत्यं मिथ्या वा ?

उ०-मिथ्या यतोहि तन्त्रे अभीष्टयुगाद् कालगणना भवति।

15-होराशब्दः कस्मात् शब्दात् उपपन्नः ?

उ०-होराशब्दः अहोरात्र-शब्दात् निष्पन्नः।

16-एकस्मिन् अहोरात्रे कति होराः भवन्ति ?

उ०- एकस्मिन्नहोरात्रे चतुर्विंशतिः (24) होराः भवन्ति।

17-होरास्कन्धस्य कस्याम् पद्दतौ प्रत्यक्षवैरा दृष्टिः भवति ?

उ०-ताजिकपद्दतौ।

18-संहितास्कन्धे जातकस्य फलादेशसम्बन्धिविवेचमन् अस्ति ,सत्यनसत्यं वा ?

उ०-असत्यम्। यतो हि जातकस्य फलसम्बन्धि-विवेचनं होरास्कन्धे अस्ति।

19-प्रश्नस्कन्धः कस्मात् स्कन्धात् उत्पन्नः ?

उ०-जातस्कन्धात्।

20-यात्रासमये हिक्का शुभशकुनं भवति न वा ?

उ०-न भवति।

21-प्रश्नस्कन्धे प्रश्नलग्नं प्रयुज्यते वा जन्मलग्नम् ?

उ०-प्रश्नलग्नम्।

22-पल्लीयपतनस्य विचारः ताजिकशास्त्रे भवति सत्यं मिथ्या वा ?

उ०-मिथ्या यतो हि पल्लीपतनस्य विचारः शकुनस्कन्धे क्रियते।

23-मुहूर्त्तस्य परिभाषा देया ?

उ०-कस्यचित् कार्यस्य कृते उपयुक्तः शुभकालः मुहूर्त्तः।

24-एकस्मिन् अहनि कति मुहूर्त्ताः भवन्ति ?

उ०-एकस्मिन् अह्नि पञ्चदशमुहूर्त्ताः भवन्ति।

25-एकस्य मुहूर्त्तस्य मानम् कति घट्यात्मकं भवति ?

उ०-एकस्य मुहूर्त्तस्य मानं द्विघट्यात्मकं भवति।

26-वराहमिहिरमते प्रथममुहूर्त्तस्य नाम किम् ?

उ०-शिवः प्रथमः मुहूर्त्तः।

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

27-मृगशिरानक्षत्रे यत्कार्य निर्दिष्टं तत् कस्मिन् मुहूर्त्ते कर्त्तु शक्यते ?

उ०-मृगशिरानक्षत्रस्य कार्य एकादशे इन्दुमुहूर्त्ते कर्त्तु शक्यते।

28-भार्या त्रिवर्गकरणम् इत्यत्र के त्रयः वर्गाः ?

उ०-धर्म-अर्थ-कामाः

29-शुभशीलयुक्ता भार्या कदा भवति ?

उ०-शुभलग्ने (मुहूर्त्ते) विवाहात्।

30-रत्नमाला कस्य रचना अस्ति ?

उ०-श्रीपतिमिश्रस्य।

31-विवाहपटलस्य निर्णयामृतटीका केन कारिता ?

उ०-पीताम्बरेण

32-मुहूर्त्तचूडामणिः कस्य रचना अस्ति ?

उ०-शिवदैवज्ञस्य।

33- मुहूर्त्तचिन्तामणिग्रन्थस्य रचना कदाऽभवत् ?

उ०- मुहूर्त्तचिन्तामणिग्रन्थस्य रचना 1522 शकाब्दे अभवत्।

केन्द्रीयसंस्कृतविश्वविद्यालयः

34- मुहूर्त्तचिन्तामणिग्रन्थरचनायाः प्रयोजनम् किम् ?

उ०-क्रियाकलापप्रतिपत्तिहेतुः

35-मुहूर्त्तचिन्तामणौ कति प्रकरणनि सन्ति?

उ०-त्रयोदश प्रकरणनि सन्ति।

36-मुहूर्त्तचिन्तामणेः प्रथमः प्रकरणः कः ?

उ०-शुभाशुभप्रकरणम्।

डॉ ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

37-क्षयमास-अधिमास सम्बन्धिज्ञानम् मुहूर्त्तचिन्तामणेः कस्मिनप्रकरणे निहितम् ?

उ०-संक्रान्तिप्रकरणे।

38-मुहूर्त्तचिन्तामणेः पञ्चमप्रकरणस्य नाम किम् ?

उ०- संस्कारप्रकरणम्।

39-चतुराश्रमेषु श्रेष्ठः कः आश्रमः ?

उ०-ग्रहस्थाश्रमः।

40-द्विरागमनसम्बन्धितविवेचनम् वधुप्रवेशप्रकरणेऽस्ति सत्यमसत्यं वा ?

उ०-असत्यम् ।यतो हि द्विरागमनसम्बन्धितविवेचनाय द्विरागमनप्रकरणम् स्वतन्त्रप्रकरणम् अस्ति।

41-काकिणीविचारः मुहूर्त्तचिन्तामणेः कस्मिन प्रकरणे निहितम् ?

उ०-वास्तुप्रकरणे अस्ति ।

42-रामदैवज्ञस्य पितामहः कः ?

उ०- रामदैवज्ञस्य पितामहः चिन्तामणिदैवज्ञः आसीत् ।

43-ताजिकनीलकण्ठी कस्य रचना ?

उ०-नीलकण्ठदैवज्ञेन ।

44-पीयूषधाराटीकाकारः कः?

उ०-पीयूषधाराटीकाकारः गोविन्ददैवज्ञः आसीत् ।

45- मुहूर्त्तचिन्तामणिग्रन्थस्य रचना कुत्र अभवत् ?

उ०- मुहूर्त्तचिन्तामणिग्रन्थस्य रचना वाराणस्याम् अभवत् ।

46-रामदैवज्ञस्य पितुः नाम किम्?

उ०-रामदैवज्ञस्य पितुर्नाम अनन्तदैवज्ञः आसीत् ।

47- मुहूर्त्तचिन्तामणिग्रन्थस्य रचनाकर्त्ता कः ?

उ०- मुहूर्त्तचिन्तामणिग्रन्थस्य रचनाकर्त्ता श्रीरामदैवज्ञः अस्ति ।

48-श्रीगोविन्ददैवज्ञेन लिखितायाः टीकायाः नाम किम् ?

उ०- श्रीगोविन्ददैवज्ञेन लिखितायाः टीकायाः नाम "पीयूषधारा" टीका वर्त्तते ।

49-अनुबन्धचतुष्टयं किम् ?

उ०-सम्बन्ध-विषय-प्रयोजन अधिकारी अनुबन्धचतुष्टयं भवति ।

50-श्रीरामदैवज्ञेन ग्रन्थरचनाया किं प्रयोजनमुक्तम्?

उ०-श्रीरामदैवज्ञेन ग्रन्थरचनाया किं प्रयोजनमुक्तम् – "क्रियाकलापप्रतिपत्तिहेतुः"।

51-भौमवासरे सिद्धियोगः कथं भवति ?

उ०-जयातिथिषु (3,8,13) भौमवासरे सिद्धियोगः भवति ।

52-शनिवासरे मृतयोगः कथं भवति ?

उ०- शनिवासरे पूर्णातिथिषु (5,10,15,30) मृतयोगाः भवन्ति।

53-"त्वाष्ट्र" शब्देन कस्य नक्षत्रस्य बोधः भवति ?

उ०-"त्वाष्ट्र" शब्देन चित्रानक्षत्रस्य बोधः भवति ।

54-कस्य वासरस्य संयोगेन ज्येष्ठानक्षत्रे दग्धयोगः भवति ?

उ०- शुक्रवासरस्य संयोगेन ज्येष्ठानक्षत्रे दग्धयोगः भवति ।

55-"अन्त्यं" कस्य नक्षत्रस्य संज्ञाः ?

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

उ०-“अन्त्यं” रेवतिनक्षत्रस्य संज्ञाः भवति ।

56-क्रकचयोगः कदा सम्भवति ?

उ०-यदि तिथिवारयोः योगः त्रयोदश भवति तदा क्रकचयोगः भवति ।

57-रविवासरे कस्यां तिथौ  क्रकचयोगः भवति?

उ०- रविवासरे द्वादशीतिथौ  क्रकचयोगः भवति ।

58-बुधवासरे प्रतिपद् तिथौ कः योगः भवति ?

उ०- बुधवासरे प्रतिपदातिथौ संवर्तक योगः भवति ।

59-काः तिथयः दन्तधावने निषिद्धाः भवन्ति ?

उ०-षष्ठी,प्रतिपदा,अमावस्या,तिथयः दन्तधावने निषिद्धाः भवन्ति ।

60-कस्यां तिथौ क्षौरकार्य न करणीयम् ?

उ०-चतुर्दशयां तिथौ क्षौरकार्य न करणीयम् ।

61-कासु तिथिषु तैलाभ्यगं न करणीयम् ?

उ०-त्रयोदशी, दशमी,तथा च द्वितीया तिथिषु तैलाभ्यगं न करणीयम् ।

62-अमावस्यायामपि मैथुनं कदा कर्त्तु शक्यते ?

उ०-दीपावली पर्वे अमावस्यायामपि मैथुनं कदा कर्त्तु शक्यते ।

63-ईश शब्देन कस्याः तिथेः बोधः भवति ?

उ०-ईश शब्देन एकादशीतिथिः ग्रह्यते ।

64-सोमवासरे का तिथिः दग्धा भवति ?

उ०- सोमवासरे एकादशीतिथिः दग्धा भवति ।

65-बुधवासरे हुताशनयोगः कथं भवति ?

उ०- बुधवासरे  अष्टमीतिथौ हुताशनयोगः भवति ?

66-मार्गशीर्षमासे काः तिथयः शून्याः भवन्ति ?

उ०-मार्गशर्षमासे उभयोः पक्षयोः सप्तम्यष्टम्यौ तिथि शून्ये भवतः ।

67-माधवः शब्देन कस्य  मासस्य बोधः भवति?

उ०-माधवः शब्देन वैशाखमासः ग्रह्यते ।

68-अग्निः शब्देन किं  ग्राह्यते ?

उ०-अग्नि शब्देन तृतीयातिथेः बोधः भवति ।

69-माघशुक्लपक्षे का तिथिः शून्या भवति ?

उ०- माघशुक्लपक्षे  षष्ठीतिथिः शून्या भवति ।

70-षष्ठयां तिथौ किं नक्षत्रं निन्द्यं भवति ?

उ०- षष्ठयां तिथौ रोहिणी नक्षत्रं निन्द्यं भवति ।

71-त्र्युत्तराः शब्दस्य कः अर्थः ?

उ०-त्र्युत्तरा शब्देन उत्तराभाद्रपद् ,उत्तराफाल्गुनी ,उत्तराषाढानक्षत्राणि ग्रह्यन्ते ।

72-कस्यां तिथौ आश्लेषानक्षत्रं निन्द्यं भवति ?

उ०- द्वादश्यां  तिथौ आश्लेषानक्षत्रं निन्द्यं भवति ।

73-कस्मिन् मासे पूर्वाभाद्रपद् नक्षत्रं शून्यं भवति ?

उ०- अश्विनमासे पूर्वाभाद्रपद् नक्षत्रं शून्यं भवति ।

74-पौषमासे कति नक्षत्राणि शून्यसंज्ञकानि भवन्ति? नामानिलेख्यानि ?

उ०- पौषमासे त्रीणिनक्षत्राणि शून्यसंज्ञकानि भवन्ति ।

75-विश्वेज्यौ शब्दस्य कः अर्थः ?

उ०-विश्वेज्यौ शब्देन उत्तराषाढापुण्यनश्क्षत्रे गृह्यते ।

76-एकस्य सौरवर्षस्य मानं कियते भवति ?

उ०-एकस्य सौरवर्षस्य मानं 365 दिनानि 15 घटयः 22 पलानि 57 विपलानि भवति।

केन्द्रीयसंस्कृतविश्वविद्यालयः

77-क्षयमासः किं भवति ?

उ०-द्विसंक्रान्तिमासः क्षयमासः भवति ।

78-सायनसूर्ये कन्याराशिस्थिते सति का ऋतुः भवति ?

उ०- सायनसूर्ये कन्याराशिस्थिते सति शरद  ऋतुः भवति ।

79-पूर्णिमाकाले धनिष्ठानक्षत्रसंयोगे कः मासः भवति ?

उ०- पूर्णिमाकाले धनिष्ठानक्षत्रसंयोगे श्रावणमासः भवति ।

80-माघमासे कः राशिः शून्यराशिः भवति ?

उ०-माघमासे मकर राशिः शून्यराशिः भवति ।

81-मीनराशेः अधिपतिः ग्रहः कः ?

उ०--मीनराशेः अधिपतिः वृहस्पतिः  भवति।

82-केषां राशीणां क्षत्रियवर्णः भवति ?

उ०-मेष,सिहं,धनु राशीणां क्षत्रियवर्णः भवति।

83-जलतत्वराशयः के ?

उ०-कर्कवृश्चिकमीनराशयः जलतत्वराशयः भवन्ति ।

84-दग्धलग्नम्, शून्यलग्नम् भवति सत्यम् असत्यं वा ?

उ०-सत्यम् अस्ति ,यतो हि शून्यलग्नमेव दग्धलग्नम् इति नाम्ना आख्यातम् ।

85-दग्धलग्नस्य दोषाः कस्मिन् देशे विवजर्याः ?

उ०-दग्धलग्नानि मध्यदेशे विवजर्यानि ।

86-दग्धलग्नदोषः कासु तिथिषु भवति ?

उ०-दग्धलग्नस्य दोषः विषमतिथिषु भवति ।

87-तृतीयायां दग्धलग्नौ कौ?

उ०-तृतीयायां सिहमकरौ दग्धलग्नौ भवतः ।

88- कुण्डल्यां लग्नस्थानं कुत्र  भवति ?

उ०-कुण्डल्यां प्रथमकोष्ठक लग्नस्य भवति ।

89-कति अन्धक लग्नानि भवन्ति ?

उ०-षड् अन्धक लग्नानि भवन्ति ।

90-दिवाकाले पगुलग्नम् किम् ?

उ०-दिवाकाले  कुम्भः पगुलग्नम् भवति ।

91-निशान्धराशिः कः ?

उ०-कन्या मिथुनः कर्कश्च निशान्धराशयः सन्ति ।

92-पगु-अन्ध-काणलग्नानि कुत्र विवजर्यानि ?

उ०-गौड-मालवयोः वजर्यानि ।

93-ये सिद्धयोगाः तिथिवशात् अशुभाः भवन्ति ते मधुसर्पिष् योगाः कथ्यन्ते। सत्यमसत्यं वा ?

उ०-सत्यमस्ति। यतो हि वारनक्षत्रयो वशात् उत्पन्नाः सिद्धयोगाः तिथिवशात् मधुसर्पिस् नामकाः अशुभाः योगाः भवन्ति ।

94-वशिष्ठमते मधुसर्पिष् योगानां का संज्ञा ?

उ०- वशिष्ठमते मधुसर्पिष् योगाः हलाहलयोगाः इति नाम्ना कथिताः ।

95-वशिष्ठमते हलाहलयोगे किं कर्त्तव्यम्?

उ०- वशिष्ठमते हलाहलयोगे शत्रूच्चाटनम् तथा मारणकार्याणि कर्त्तव्यानि ।

96-भौमाश्विनीयोगः कस्मिन् कार्ये विवर्जयते ?

उ०- भौमाश्विनीयोगः ग्रहप्रवेशे  कार्ये विवर्जयते ।

97-ध्रुवनक्षत्रे कीदृशं कार्यम् कर्त्तव्यम् ?

उ०-ध्रुवनक्षत्रे स्थिरकार्याणि कर्त्तव्यानि ।

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

98-आनन्दादियोगेषु चतुर्थः कः योगः ?

उ०- आनन्दादियोगेषु चतुर्थः घातयोगः वर्तते ।

99-आनन्दादि-कतियोगा गणिताः सन्ति ?

उ०- आनन्दादि –अष्टाविंशतियोगाः सन्ति ।

100- आनन्दादियोगेषु कति शुभयोगाः सन्ति ?

उ०- आनन्दादियोगेषु पञ्चदश शुभयोगाः सन्ति ।

101-निम्नलिखितेषु शुभयोगः नास्ति-

(अ) आनन्दः (ख) धाता  (ग) वज्रः  (घ) चरः

उ०-वज्र योगः ।

102-रविवासरे अश्विनीनक्षत्रं स्यात्तदा कः योगः भवति ?

उ०- आनन्दयोग ।

103-बुधवासरे आनन्दयोगकरं नक्षत्रम् किम् ?

उ०-हस्तनक्षत्रम् ।

104-ध्वांक्षयोगे कति घट्यः त्याज्याः भवति ?

उ०- ध्वांक्षयोगे पञ्चघट्यः त्याज्याः भवति ।

105-कस्मिन् योगे एकघट्यनन्तरं कार्य कर्त्तु शक्यते ?

उ०-धूम्रयोगे ।

106-केषां योगानां समस्तकालः वर्जनीय ?

उ०-रक्षा- मृत्यु- पात- कालयोगानां समस्तकालं वर्जनीयम् ।

107-चरयोगे वजर्यघटीवर्णनं कस्मिन् ग्रन्थे अस्ति ?

उ०- चरयोगे वजर्य घटीविषये ज्योतिः सारसागरनानक ग्रन्थे वर्णनम् अस्ति ।

108-रवियोगे सूर्याचन्द्रमसोर्मध्ये कियदन्तरं भवति ?

उ०-चत्वारः,षड् ,नवमः,दशमः,त्रयोदशः तथा विंशति ।

109- रवियोगस्य किं वैशिष्टयम् ?

उ०- रवियोगः दोषसंघविनाशकः भवति ।

110-यदि सूर्यः कृत्तिकायां स्यात्तदा चन्द्रस्य कुत्र-कुत्र गमने रवियोगः भवति ।

उ०-आर्द्रा-पुष्यः ,पूर्वाफाल्गुनिका,उत्तराफाल्गुनिका ,स्वाती श्रवणे च ।

111-सर्वार्थसिद्धियोगः शुभयोगे भवति अशुभो वा  ?

उ०-शुभयोगः ।

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ.ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला त्रिपुरा ।

112-गुरुवासरे केषु नक्षत्रेषु सर्वार्थसिद्धियोगो भवति?

उ०-अश्विनी –पुर्नवसु-पुष्य-अनुराधा-रेवतीषु।

113-भीमपराक्रमग्रन्थानुसारेण रविवासरे कानि शुभनक्षत्राणि भवन्ति ?

उ०-मूल- पुष्य –हस्त- उत्तराफाल्गुनिका, उत्तराभाद्रपदा , नक्षत्राणि।

114- आनन्दादियोगेषु कतमः उत्पातयोगः अस्ति ?

उ०-षोडशतमः।

115-उत्पातादिषु कः योगः शुभः वर्तते ?

उ०-सिद्धियोगः।

116-सोमवासरे कस्मिन्नक्षत्रे काणायोगः भवति ?

उ०-अभिजित् नक्षत्रे।

117-बुधवासरे कृत्तिकानक्षत्रे सति कः योगः भवति ?

उ०- सिद्धियोगः।

118-पापग्रहाः के ?

उ०-सूर्य,भौम,शनिः क्षीणश्चन्द्रः तथा एतेषां युक्तो बुधश्चपापग्रहाः भवन्ति।

119-निशाहनोः कियत् कालं शुभकार्येषु वर्जयेत् ?

उ०- निशाहनोः अर्धे घटी त्र्यंशं(विंशति पलानि) शुभकार्येषु वर्जयेत्।

120-ग्रहणदिनात् कियदिनं पूर्व शुभं न कुर्यात् ?

उ०- ग्रहणदिनात् पूर्व दिवसत्रयं शुभंकार्य न कुर्यात्।

121-उत्पाताः कतिविधाः? के च ते ?

उ०-त्रिविधाः उत्पाताः-

1-दिव्यः 2-आन्तरिक्षः 3-भौमः

122-ग्रहयुद्धम् अन्तरिक्षजन्योत्पातः भवति। सत्यमसत्यं वा ?

उ०-असत्यं। यतोहि ग्रहसम्बन्धि –इदम् ग्रहयुद्ध दिव्य उत्पा भवति।

123- उत्पातनक्षत्राणि कियन्मासेषु त्याज्यानि ?

उ०- उत्पातनक्षत्राणि षड् मासेषु त्याज्यानि।

124-सुमेलनीयम् –

| | |
|---|---|
| (क)-ग्रहण | (क)भौमोत्पातः |
| (ख)-उल्का | (ख)- भूकम्पः |
| (ग)-वसन्ततौ शुभः | (ग)-दिव्योत्पातः |

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ. ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
परिसरः अगरतला, त्रिपुरा।

(घ)- भूकम्पः (घ)-अन्तरिक्षोत्पातः

(ड)-वर्षात्रृतौ शुभः (ड)-परिवेषदर्शनम्

125-सम्पूर्णग्रहणे –ग्रहणनक्षत्रं कियद्दिनं वर्जयेत् ?

उ०-सम्पूर्णग्रहणे –ग्रहणनक्षत्रं षण्मासं वर्जयेत् ।

126-पादग्रहणे –ग्रहणनक्षत्रं कियद्दिनं वर्जयेत् ?

उ०-पादग्रहणे –ग्रहणनक्षत्रं एकमासं यावत् वर्जयेत् ।

127-ग्रस्तास्ते सूर्ये सति वर्जनीयः कालः भवति?

(क)पूर्व दिनत्रयम् (ख) पश्चात् दिनत्रयम्

(ग)ग्रहणदिवसं (घ) पूर्वापरयोः दिवसत्रयम्

उ०- पूर्व दिनत्रयम्

128-जन्मनक्षत्रादयः शुभकार्य-योग्याः भवन्ति। सत्यनस्यं वा ?

उ०-असत्यम् ।यतो हि जन्मनक्षत्रादयः शुभकार्येषु वजर्याः भवन्ति ।

129-क्षयमास लक्षणं विधेयम् ?

उ०-द्विसंक्रान्तिमासः क्षयारव्य मासः भवति ।

130-विष्कुम्भयोगस्य कति घट्यः शुभकार्येषु गर्हिताः ?

उ०- विष्कुम्भयोगस्य घटीत्रयम् शुभकार्येषु गर्हिताः।

131- शुभकार्येषु वर्जनीयौ द्वौ मुहूर्त्तौ लेख्यौ ?

उ०- कुलिक-अर्धयामसंज्ञकौ द्वौ मुहूर्त्तौ शुभकार्येषु वर्जनीयौ भवतः ।

132-गण्डातिगण्डयोः वजर्यघट्यः कति ?

उ०- गण्डातिगण्डयोः षड् घट्य वजर्याः भवन्ति ।

133-आशा शब्दस्य कः अर्थः ?

उ०- आशा शब्दस्य अर्थः भवति-दिक् । यतो हि दश दिशः भवन्ति अतः दशसंख्या अपि ग्रह्यते ।

134-मनु शब्देन किं ज्ञायते ?

उ०- मनु शब्देन चतुर्दश संख्या ग्रह्यते ।

135-रन्ध्रतिथयः के सन्ति ?

उ०-पक्षे 4,6,8,9,12,14 तिथयः रन्ध्रसंज्ञकाः भवन्ति ।

136-द्वादशीतिथौ कियत्यः घटिकाः त्याज्याः भवन्ति ?

उ०- द्वादशीतिथौ आदिमा दश घटिकाः त्याज्याः।

योऽनूचानः स नो महान् ।
केन्द्रीयसंस्कृतविश्वविद्यालयः
केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
एकलव्यपरिसरः अगरतला, त्रिपुरा।

137-रन्ध्रघटीषु देवप्रतिष्ठायाः किं फलं भवति ?

उ०- रन्ध्रघटीषु यदि देवप्रतिष्ठा क्रियते चेत् राष्ट्रविनाशः भवति।

138-रविवासरे कः प्रहरार्ध यमघण्टकसंज्ञकः भवति ?

उ०- रविवासरे दशमप्रहरार्ध यमघण्टकसंज्ञकः भवति।

139-कुलिकादिदोषाः कदा दोषदाः न भवन्ति ?

उ०-रात्रौ कुलिकादीनां दुष्टफलं न भवति।

140-कला शब्देन कस्याः संख्याया बोधः भवति ?

उ०-कलाशब्देन षोडशसंख्याक ग्रह्यते।

141-कलांश शब्दस्य कोऽर्थः ?

उ०- कलांश शब्दस्य अर्थ भवति-

दिनमानस्य षोडशतमभागः।

142-रविवासरे अर्धयामदोषः कदा भवति ?

उ०-रविवासरे चतुर्थप्रहरे अर्धयामदोषः कदा भवति।

143-भौमवासरे के प्रहरार्धाः दुष्टाः भवन्ति ?

उ०- भौमवासरे 2,3,4,6,10 प्रहरार्धाः दुष्टाः भवन्ति।

144-विपाशा कस्याः नद्याः नाम अस्ति ?

उ०- विपाशा आधुनिक व्यासनद्याः नाम अस्ति।

145-होलिकापर्वः कदा आचर्यते ?

उ०-फाल्गुनमासस्य पूर्णिमायां होलिकापर्वः भवति।

146- होलिकापर्वतः कतिदिनात्प्राक् शुभकार्याणि न आचर्यन्ते ?

उ०- होलिकापर्वतः अष्टदिनेभ्यः प्राक् शुभकार्याणि नैव आचर्यन्ते।

147-मृत्युयोगः कदा भवति ?

उ०-सोमवासरे पूर्वाषाढानक्षत्रे सम्प्राप्ते सति मृत्युयोगःभवति।

148-षष्ठीतिथौ सोमवासरः स्यात्तदा कः योगः सम्भवति ?

उ०-क्रकचयोग।

149-दग्धयोगः कदा भवति ?

उ०-सूर्येशपञ्चाग्निरसाष्टनन्दादियोगवशात्।

150-अत्र यामशब्दस्य कोऽर्थ ?

उ०-प्रहरः।

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
त्रिपुरा।

151-भद्रायोगः कदा भवति ?

उ०-यदा विष्टिकरणं भवति ।

152-करणम् इत्यस्य कोऽर्थ ?

उ०-तिथ्यर्ध करणम् ।

153-शम्भुतिथिः का भवति ?

उ०-चतुर्दशी ।

154-भद्रायाःमुखपुच्छयोः शुभाशुभफलं किं भवति ?

उ०-मुखस्याशुभं पुच्छस्य शुभम् ।

155-चलकरणानि कानि नामानि ?

उ०-बव-वावल-कौलन-तैतिल-गर-वणिज-विष्टि ।

156-अलि शब्दस्य कोऽर्थ ?

उ०-वृश्चिकः ।

157-आराम इति शब्दस्य कोऽर्थ ?

उ०-उपवनम् ।

158-कियत्संख्यकानि महादानानि सन्ति ?

उ०-षोडशसंख्यकानि महादानि भवन्ति ।

159-मुण्डनसंस्कारस्य किम् तात्पर्यम् ?

उ०-जातकस्य चूडाकरणसंस्कारः ।

160-इज्यसितयोः कोऽर्थ भवति ?

उ०-गुरुशुक्रयोः अर्थयोः भवतः ।

161-सिंहनक्रस्थजीवे इति कोऽभप्रायः ?

उ०-सिहंमरकयोः राश्योः गुरोः स्थिति ।

162-लुप्तसंवत्सरः कः ?

उ०-गुरुः यदा मेष-वृष-कुम्भ-मीनादिराशिचतुष्टयं विहाय शेषेषु अष्टसु राशीषु कस्मिश्चिद्राशौ स्थित्वा अग्रिमराशौ अतिचारेण समागतः पुनः वक्री संभूय पूर्वस्मिन् राशौ नैव समायति तदा भवति लुप्तसंवत्सदोषः ।

163-समसप्तकयोगः कः ?

उ०-यस्मिन् मासे गुरुशुक्रयोः परस्परं समदृष्टिः भवेत्तदा समसप्तकयोगः भवति ।

164-मार्गिग्रहो कौ ?

केन्द्रीयसंस्कृतविश्वविद्यालयः
डॉ. ब्रह्मानन्दमिश्रः
सहायकाचार्यः ज्योतिषविभागः
परिसरः अगरतला, त्रिपुरा।

उ०- सूर्यचन्द्रौ मार्गिग्रहो भवतः ।

165-वक्रिग्रहाः के ?

उ०- कुजादि पञ्चताराग्रहाः भवन्ति ।

166-सदैव वक्रिणौ ग्रहौ कौ भवतः ?

उ०-राहुकेतु ।

167-पूर्वापरन्तरं किम् ?

उ०-द्वयोः देशयोः पूर्वस्यापरस्य चान्तरं पूर्वापरान्तरं भवतः ।

168-भूमध्यरेखा का ?

उ०-लकांनगरीतः सुमेरुपर्वतपर्यन्तं यत्सूत्रं गच्छति तत्सूत्रात् अधोवर्तिनो ये देशास्सन्ति ते भूमध्य देशा इति कथ्यन्ते ।

169- पूर्वापरान्तरस्यापरं नाम किम् ?

उ०-देशान्तरम् ।

170-रेखादेशा के? नामानि लेख्यानि ?

उ०-जयपुर–उज्जयनी-चिकमगलुर-टोक-सोलापुर–कल्लिटोकम् इत्यादयः रेखादेशाः उच्यन्ते ।

केन्द्रीयसंस्कृतविश्वविद्यालयः

## दीर्घोत्तरप्रश्नाः

1. मुहूर्तचिन्तामणिग्रन्थस्य वैशिष्ट्यं निरूपयत्।
2. मुहूर्तचिन्तामणिग्रन्थस्य मंगलाचरणं व्याख्यायताम्।
3. आचार्य रामदैवज्ञस्य वंशपरिचयः दीयताम्।
4. तिथीनां स्वामीनां नामानि प्रतिपादयत्।
5. तिथीनां नन्दादिसंज्ञा वर्णयत्।
6. दग्धनक्षत्रज्ञानं कथं क्रियते स्पष्टयत्।
7. रव्यादिवारेषु क्रकचयोगाः कथं भवन्ति ?
8. हुताशन योगानां विवेचनं करोतु।
9. चैत्रादिमासेषु शून्यराशयः लिखत।
10. गृहप्रवेशादिषु कार्येषु के योगाः वर्जनीयाः निरुप्यताम्।